# શ્રીકાશીવિશ્વનાથસ્તોત્રમ

## Shri Kashivishvanatha Stotram

---

શ્રી કાશીવિશ્વનાથ સ્તોત્રમ

કણ્ઠે યસ્ય લસત્કરાળગરળં ગઙ્ગાજલં મસ્તકે
વામાઙ્ગે ગિરિરાજરાજતનયા જાયા ભવાની સતી ।
નન્દિસ્કન્દગણાધિરાજસહિતા શ્રીવિશ્વનાથપ્રભુઃ
કાશીમન્દિરસંસ્થિતોઽખિલગુરુર્દેયાત્સદા મઙ્ગળમ ।।૧।।

યો દેવૈરસુરૈર્મુનીન્દ્રતનયૈર્ગન્ધર્વયક્ષોરગૈ-
ર્નાગર્ભૂતલવાસિભિર્દ્વિજવરૈઃ સંસેવિતઃ સિદ્ધયે ।
યા ગઙ્ગોત્તરવાહિની પરિસરે તીર્થૈરસઙ્ખ્યૈર્વૃતા
સા કાશી ત્રિપુરારિરાજનગરી દેયાત્સદા મઙ્ગળમ ।।૨।।

તીર્થાનાં પ્રવરા મનોરથકરી સંસારપારાપરાનન્દા
નન્દિગણેશ્વરૈરુપહિતા દેવૈરશેષૈઃ સ્તુતા ।
યા શંભોર્મણિકુણ્ડલૈકકણિકા વિષ્ણોસ્તપોદીર્ઘિકા
સેયં શ્રીમણિકર્ણિકા ભગવતી દેયાત્સદા મઙ્ગળમ ।।૩।।

એષા ધર્મપતાકિની તટરુહાસેવાવસન્નાકિની
પશ્યન્પાતકિની ભગીરથતપઃસાફલ્યદેવાકિની ।
પ્રેમારૂઢપતાકિની ગિરિસુતા સા કેકરાસ્વાકિની
કાશ્યામુત્તરવાહિની સુરનદી દેયાત્સદા મઙ્ગળમ ।।૪।।

વિઘ્નાવાસનિવાસકારણમહાગણ્ડસ્થલાલમ્બિતઃ
સિન્દૂરારુણપુઞ્જચન્દ્રકિરણપ્રચ્છાદિનાગાચ્છવિઃ
શ્રીવિશ્વેશ્વરવલ્લભો ગિરિજયા સાનન્દકાનન્દિતઃ
સ્મેરાસ્યસ્તવ ઢુણ્ઢિરાજમુદિતો દેયાત્સદા મઙ્ગળમ ।।૫।।

કેદારઃ કલશેશ્વરઃ પશુપતિર્ધર્મેશ્વરો મધ્યમો
જ્યેષ્ઠેશો પશુપશ્ચ કન્દુકશિવો વિઘ્નેશ્વરો જમ્બુકઃ ।
ચન્દ્રેશો હ્યમૃતેશ્વરો ભૃગુશિવઃ શ્રીવૃદ્ધકાલેશ્વરો
મધ્યેશો મણિકર્ણિકેશ્વરશિવો દેયાત્સદા મઙ્ગળમ ।।૬।।

ગોકર્ણસ્ત્વથ ભારભૂતનુદનુઃ શ્રીચિત્રગુપ્તેશ્વરો
યક્ષેશસ્તિલપર્ણસઙ્ગમશિવો શૈલેશ્વરઃ કશ્યપઃ ।

નાગેશોઽગ્નિશિવો નિધીશ્વરશિવોઽગસ્તીશ્વરસ્તારક-
જ્ઞાનેશોઽપિ પિતામહેશ્વરશિવો દેયાત્સદા મઙ્ગળમ || ૭||

બ્રહ્માણ્ડં સકલં મનોષિતરસૈ રત્નૈઃ પયોભિર્હરં
ખેલૈઃ પૂરયતે કુટુમ્બનિલયાન શંભોર્વિલાસપ્રદા |
નાનાદિવ્યલતાવિભૂષિતવપુઃ કાશીપુરાધીશ્વરી
શ્રીવિશ્વેશ્વરસુન્દરી ભગવતી દેયાત્સદા મઙ્ગળમ ||૮||

યા દેવી મહિષાસુરપ્રમથની યા ચણ્ડમુણ્ડાપહા
યા શુમ્ભાસુરરક્તબીજદમની શક્રાદિભિઃ સંસ્તુતા |
યા શૂલાસિધનુઃશરાભયકરાદુર્ગાદિસન્દક્ષિણા-
માશ્રિત્યાશ્રિતવિઘ્નશંસમયતુ દેયાત્સદા મઙ્ગળમ || ૯||

આદ્યા શ્રીર્વિકટા તતસ્તુ વિરજા શ્રીમઙ્ગળા પાર્વતી
વિખ્યાતા કમલા  વિશાલનયના જ્યેષ્ઠા વિશિષ્ટાનના |
કામાક્ષી ચ હરિપ્રિયા ભગવતી શ્રીઘણ્ટઘણ્ટાદિકા
મૌર્યા ષષ્ટિસહસ્રમાતૃસહિતા દેયાત્સદા મઙ્ગળમ || ૧૦||

આદૌ પઞ્ચનદં પ્રયાગમપરં કેદારકુણ્ડં કુરુ-
ક્ષેત્રં માનસકં સરોઽમૃતજલં શાવસ્ય તીર્થં પરમ |
મત્સ્યોદર્યથ દણ્ડખાણ્ડસલિલં મન્દાકિની જમ્બુકં
ઘણ્ટાકર્ણસમુદ્રકૂપસહિતો દેયાત્સદા મઙ્ગળમ || ૧૧||

રેવાકુણ્ડજલં સરસ્વતિજલં દુર્વાસકુણ્ડં તતો
લક્ષ્મીતીર્થલવાઙ્કુશસ્ય સલિલં કન્દર્પકુણ્ડં તથા |
દુર્ગાકુણ્ડમસીજલં હનુમતઃ કુણ્ડપ્રતાપોર્જિતઃ
પ્રજ્ઞાનપ્રમુખાનિ વઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ ||૧૨||

આદ્યઃ કૂપવરસ્તુ કાલદમનઃ શ્રીવૃદ્ધકૂપોઽપરો
વિખ્યાતસ્તુ પરાશરસ્તુ વિદિતઃ કૂપઃ સરો માનસઃ |
જૈગીષવ્યમુનેઃ શશાઙ્કનૃપતેઃ કૂપસ્તુ ધર્મોદ્ભવઃ
ખ્યાતઃ સપ્તસમુદ્રકૂપસહિતો દેયાત્સદા મઙ્ગળમ ||૧૩||

લક્ષ્મીનાયકબિન્દુમાધવહરિર્લક્ષ્મીનૃસિંહસ્તતો
ગોવિન્દસ્ત્વથ ગોપિકાપ્રિયતમઃ શ્રીનારદઃ કેશવઃ
ગઙ્ગાકેશવવામનાખ્યતદનુ શ્વેતો હરિઃ કેશવઃ
પ્રહ્લાદાદિસમસ્તકેશવગણો દેયાત્સદા મઙ્ગળમ ||૧૪||

લોલાર્કોવિમલાર્કમાયુખરવિઃ સંવર્તસઞ્જ્ઞો
રવિર્વિખ્યાતો દ્રુપદુઃખસ્વોલ્કમરુણઃ પ્રોક્તોત્તરાર્કો રવિઃ |
ગઙ્ગાર્કસ્ત્વથ વૃદ્ધવૃદ્ધિવિબુધા કાશીપુરીસંસ્થિતાઃ

સૂર્યા દ્વાદશસંજ્ઞકાઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ || ૧૫||

આદ્યો ઢુણ્ઢિવિનાયકો ગણપતિશ્ચિન્તામણિઃ સિદ્ધિદઃ
સેનાવિઘ્નપતિસ્તુ વક્રવદનઃ શ્રીપાશપાણિઃ પ્રભુઃ |
આશાપક્ષવિનાયકાપ્રષકરો મોદાદિકઃ ષડ્ગુણો
લોલાર્કાદિવિનાયકાઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ ||૧૬||

હેરમ્બો નલકૂબરો ગણપતિઃ શ્રીભીમચણ્ડીગણો
વિખ્યાતો મણિકર્ણિકાગણપતિઃ શ્રીસિદ્ધિદો વિઘ્નપઃ|
મુણ્ડશ્ચણ્ડમુખશ્ચ કષ્ટહરણઃ શ્રીદણ્ડહસ્તો ગણઃ
શ્રીદુર્ગાખ્યગણાધિપઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ ||૧૭||

આદ્યો ભૈરવભીષણસ્તદપરઃ શ્રીકાલરાજઃ ક્રમા-
ચ્છ્રીસંહારકભૈરવસ્ત્વથ રુરુશ્ચોન્મત્તકો ભૈરવઃ |
ક્રોધશ્ચણ્ડકપાલભૈરવવરઃ શ્રીભૂત નાથાદયો
હ્યષ્ટૌ ભૈરવમૂર્તયઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ ||૧૮||

આધાતોઽમ્બિકયા સહ ત્રિનયનઃ સાર્ધં ગણૈર્નન્દિતાં
કાશીમાશુ વિશન હરઃ પ્રથમતો વાર્ષધ્વજેઽવસ્થિતઃ |
આયાતા દશ ધેનવઃ સુકપિલા દિવ્યૈઃ પયોભિર્હરં
ખ્યાતં તદ્વૃષભધ્વજેન કપિલં દેયાત્સદા મઙ્ગળમ || ૧૯||

આનન્દાખ્યવનં હિ ચમ્પકવનં શ્રીનૈમિષં ખાણ્ડવં
પુણ્યં ચૈત્રરથં ત્વશાકવિપિનં રમ્ભાવનં પાવનમ |
દુર્ગારણ્યમથોઽપિ કૈરવવનં વૃન્દાવનં પાવનં
વિખ્યાતાનિ વનાનિ વઃ પ્રતિદિનં દેયાત્સદા મઙ્ગળમ ||૨૦||

અલિકુલદલનીલઃ કાલદંષ્ટ્રાકરાળઃ
સજલજલદનીલો વ્યાલયજ્ઞોપવીતઃ |
અભયવરદહસ્તો ડામરોદ્દામનાદઃ
સકલદુરિતભક્ષો મઙ્ગળં વો દદાતુ || ૨૧||

અર્ધાઙ્ગે વિકટા ગિરિન્દ્રતનયો ગૌરી સતી સુન્દરી
સર્વાઙ્ગે વિલસદ્વિભૂતિધવળો કાલો વિશાલેક્ષણઃ
વીરેશઃ સહનન્દિભૃઙ્ગિસહિતઃ શ્રીવિશ્વનાથઃ પ્રભુઃ
કાશીમન્દિરસંસ્થિતોઽખિલગુરુર્દેયાત્સદા મઙ્ગળમ ||૨૨||

યઃ પ્રાતઃ પ્રયતઃ પ્રસન્નમનસા પ્રેમપ્રમોદાકુલઃ
ખ્યાતં તત્ર વિશિષ્ટપાદભુવનેશેન્દ્રાદિભિર્યત્સ્તુતમ |
પ્રાતઃ પ્રાઙ્મુખમાસનોત્તમગતો બ્રુયાચ્છૃણોત્યાદરાત
કાશીવાસમુખાન્યવાપ્ય સતતં પ્રીતે શિવે ધૂર્જટિઃ ||૨૩||

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં કાશીવિશ્વનાથસ્તોત્રં સંપૂર્ણમ ||

**www.shaivam.org**